# gaNapatistotram

# ગણપતિસ્તોત્રમ્

## Document Information

Text title : Ganapatistotram 3

File name : gaNapatistotramShankarAchArya.itx

Category : ganesha, stotra, shankarAchArya

Location : doc_ganesha

Author : Shankaracharya

Transliterated by : Sumit

Proofread by : Sumit, NA

Latest update : June 1, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 10, 2025

*sanskritdocuments.org*

# ગણપતિસ્તોત્રમ્

સુવર્ણવર્ણસુન્દરં સિતૈકદન્તબન્ધુરં
ગૃહીતપાશકાङ્કુશં વરપ્રદાભયપ્રદમ્ ।
ચતુર્ભુજં ત્રિલોચનં ભુજङ્ગમોપવીતિનં
પ્રફુલ્લવારિજાસનં ભજામિ સિન્ધુરાનનમ્ ॥ ૧॥

કિરીટહારકુણ્ડલં પ્રદીપ્તબાહુભૂષણં
પ્રચણ્ડરત્નકङ્કણં પ્રશોભિતાङ્ઘ્રિયષ્ટિકમ્ ।
પ્રભાતસૂર્યસુન્દરામ્બરદ્વયપ્રધારિણં
સરત્નહેમનૂપુરં પ્રશોભિતાङ્ઘ્રિપङ્કજમ્ ॥ ૨॥
સુવર્ણદણ્ડમણ્ડિતપ્રચણ્ડચારુચામરં
ગૃહપ્રતીર્ણસુન્દરં યુગક્ષણં પ્રમોદિતમ્ ।
કવીન્દ્રચિત્તરઞ્જકં મહાવિપત્તિભઞ્જકં
ષડક્ષરસ્વરૂપિણં ભજેદ્ગજેન્દ્રરૂપિણમ્ ॥ ૩॥

વિરિઞ્ચિવિષ્ણુવન્દિતં વિરૂપલોચનસ્તુતિં
ગિરીશદર્શનેચ્છયા સમર્પિતં પરાશયા ।
નિરન્તરં સુરાસુરૈઃ સપુત્રવામલોચનૈઃ
મહામખેષ્ટમિષ્ટકર્મસુ (સ્મૃતં) ભજામિ તુન્દિલમ્ ॥ ૪॥

મદૌઘલુબ્ધચઞ્ચલાર્કમઞ્જુગુઞ્જિતારવં
પ્રબુદ્ધચિત્તરઞ્જકં પ્રમોદકર્ણચાલકમ્ ।
અનન્યભક્તિમાનવં પ્રચણ્ડમુક્તિદાયકં
નમામિ નિત્યમાદરેણ વક્રતુણ્ડનાયકમ્ ॥ ૫॥

દારિદ્ર્યવિદ્રાવણમાશુ કામદં સ્તોત્રં પઠેદેતદજસ્રમાદરાત્ ।
પુત્રીકલત્રસ્વજનેષુ મૈત્રી પુમાન્ભવેદેકવરપ્રસાદાત્ ॥૬॥

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં ગણપતિસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Sumit

*gaNapatistotram*

pdf was typeset on May 10, 2025

Please send corrections to *sanskrit@cheerful.com*